CC0. In Public Domain. Digitization by eGangotri

पण्डितराजसोमनाथसिग्घ्यालविरचितम्

सूक्तिविवेकशतकम्

(स्वोपज्ञविवृतिरत्नसमलङ्कृतम्)

प्रकाशिका

पण्डितराजसोमनाथशतवार्षिकसमारोहसमितिः

नेपालः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पण्डितराजसोमनाथसिग्घालविरचितम्

सूक्तिविवेकशतकम्

(स्वोपज्ञविवृतिरत्नसमलङ्कृतम्)



प्रकाशिका

पण्डितराजसोमनाथशतवार्षिकसमारोहसमितिः

२०४०

नेपालः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रकाशनतिथिः—

२०४१ तमवैक्रमाब्दस्याश्विनमासस्य पञ्चविंशोः दिवसः

मुद्रितपुस्तकसंख्याः— ४००

मूल्यम्—

मुद्रकः इन्दुमुद्रणालयः, ललितपुरम्, नेपालः ।

Prof. Mądhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

किञ्चिन्निवेदनम्

एष महान् प्रमोदस्यावसरो यत् पण्डितराजेन सोमनाथमहोदयेन विरचितं सोपज्ञविवृतिरत्नसमलङ्कृतं सप्तोत्तरशतसंख्याकश्लोकपरिमितं सूक्ति-विवेकशतकं नामाप्रकाशितं पुस्तकं पण्डितराजसोमनाथशतवार्षिकसमारोहसमिति-रद्यैव प्रकाशयति। तदीयजन्मशताब्दचवसरे प्रकाशतां नीतं लघुकलेवरमिदं प्रकाशन-मपि विश्वक्प्रसृतवैदुष्यस्य कीर्तिकलेवरस्य पण्डितराजमहोदयस्य प्रगाढं पाण्डित्यं प्रदर्शयितुमलमित्यस्ति मामकीनो ह्रढियान् विश्वासः। सूक्ष्मेक्षिकया सूक्तीना-मुपयोगित्वम्, वैचित्र्यम्, वाग्देवीसान्निध्योपायान्, सूक्तिभेदादींश्च प्रतिपादयन् पण्डिताग्रणीः सोमनाथः सूक्तिरूपां गीर्वाणवाणीं तद्व्याजेन च भगवतीं भारतींश्च सम्यगाराधितवानिति विदुषां नाविदितं स्यात्। ग्रन्थस्यास्य रचनाधर्मिताविषये न किमपि वक्तुमुचितं प्रतिभाति। ख्यातयशसः पण्डितराजमहोदयस्य कृतिप्रका-शनावसरोलब्ध्यैव समितिरियमात्मानं धन्यां मन्यते।

नेपालाधिराज्ये ऽस्मिन् ख्यातकीर्तयः कियन्तो विद्वद्ग्रगण्या इदानीं नामशेषतां गताः। विद्यावैभवदृशा राष्ट्रस्यैवालङ्कारभूतानां शास्त्रीय-पाण्डित्योद्भासितानां देशदेशान्तरलब्धकीर्तीनां विद्वद्धौरेयाणां गुणगौरवप्रख्या-पनदिशि न कोऽपि तादृशः स्मरणीयः प्रयासो दृष्टिगोचरतामायातीति चेखिद्यते आस्माकीनं मनः। भौतिकसुखसम्पदपेक्षया मुनिवृत्त्यैव गार्हस्थ्यजीवनं यापयतामाजीवनं विद्याभ्यासैकव्रतानां विद्यावतारभूतानां विद्वन्मूर्धन्यानां राष्ट्रविभू-तीनामपि युगानुकूलः संस्मरण – संमानरूपः कश्चिदपि प्रयासो यदि न विधीयेत तस्येकतः 'विद्वान् सर्वत्र पूज्यते' इति लोकप्रसिद्धनिर्वचनमेवाऽवमा-नितं स्यात्, अन्यतो भौतिकसमृद्धिचाकचक्यकवलितेऽस्मिन्काले कस्याऽपि जनस्य विद्याभ्यासाय वैदुष्यप्राप्तये च सश्रद्धं सयत्नमाजीवनमप्रवृत्तिः प्रसज्येत। एतादृशीमेव भावनां मनसिकृत्य वैक्रमाब्दस्य २०४० माघमासस्य १९ दिनाङ्के राज-धान्यां काष्ठमण्डपे वाल्मीकिविद्यापीठे संघटिता पण्डितराजसोमनाथशतवार्षिकसमा-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

रोहसमितिरियं सविविधजनकीयक्षेत्ररय सर्वकारस्य च साहाय्येन विविधान् कार्यक्रमान् समायोज्य पण्डितराजमहोदयस्य राष्ट्रियं विश्वजनीनञ्च योगदानं प्रख्यापयितुं तथा जन्मशताब्दीसमारोहपथेन भाषासाहित्ययोर्विकासे योगदानं प्रथयितुं च सप्रयत्ना बद्धपरिकरा च वर्वर्ति । स्मृतिग्रन्थप्रकाशन – प्रतिमास्थापन-स्मृतिवेदिकानिर्माणादिनैकविधकार्येषु तदीयानामप्रकाशितकृतीनां प्रकाशन-मप्यन्यतममस्तीति तदन्तर्गतत्वेनैवायं लघुतरः प्रकाशनप्रयासो विहितोऽस्ति ।

किञ्च– एतत्पुस्तकप्रणयनकार्यं १९६८ तमे वैक्रमवत्सर एव पूर्णतां गतमासी-दिति लेखकमहानुभावस्यैव भूमिकातोऽवगम्यते । तथापि श्रीपञ्चकयुतमहेन्द्र-शासनकालप्रारम्भेऽपि सूक्तिविवेकशतकस्य संशोधनपरिमार्जनादिकार्यं प्रचलदेवाऽऽ-सीदिति तदीयपाण्डुलिपिदर्शनेनावगन्तुं शक्यते ।

अल्पीयस्यपि समये पुस्तकप्रकाशनकार्यं सोत्साहं ससौहार्दं संपाद्य चिरस्मर-णीयं साहाय्यं कुर्वते इन्दुमुद्रणालयाय, मुद्रणादिकार्ये सहयोगं कृतवते उपप्राध्यापक-श्रीसामनाथपौडेलमहाभागाय, दिनत्रया (२०४१ । ६ । ११ तः १३ पर्यन्तम्) भ्यन्तरमेव पण्डितराजविरचिततदीयभूमिकाया अपसेटयन्त्रतः प्रतिलिपीर्विधाय सहयोगिने सिंहप्रासादस्थसर्वकारमुद्रणालयाय च शतशः साधुवादान् व्याहरन् पण्डित-राजमहोदयस्य निम्नाङ्कितपद्ययोः संस्मरणपुरःसरं कृतिमिमां विवेचकानां विदुषां पुरतः समुपाहरामि । यत्ने कृतेऽपि विविधकाठिन्यवशाद् मुद्रणादिजन्या बह्वयः स्युरेवाऽत्र त्रुटयः, गुणग्राहिणः शेमुषीमन्तः संशोधनावसरदानेनानुग्रहीष्यन्तीति आशासे ।

एतत्सूक्तेः शतकं कृतकं जेतुं प्रासादने मनसः ।
सञ्जलिबन्धं विदुषां चरणेषु विशेषतः पतति ।
अतिशेते नात्र रसो नो वा लोकोत्तरः पाकः ।
पीयूषयूषमनसामधितिष्ठेद्रुचिपथं कथङ्कारम् ॥

दिनाङ्कः– २०४१ तम- वैक्रमाब्दस्याश्विनमासस्य
पञ्चविंशो दिवसः ।

विदुषां वशंवदः-
शिवहरिमरहट्टा
सदस्य-सचिवः
पण्डितराजसोमनाथशतवार्षिकसमारोहसमितेः,
नेपालस्य ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निर्वचना सूचना

विदितसंवेदनमेवेदमवदानसंविदं विदां,-यत्,-चतुर्दशलोकवल्ली मूलमेधसो वेधसोऽपि अल्पास्पु शिल्पकल्पनासु पदं चमत्कारपरम्परां कवयदीकरोति कोऽपि हंसीरक्षीरः तत्र सारस्वतः प्रकारः. एष प्रबन्धलक्षदायी दुर्ग्रन्थानामनानिरन्नाशे वाङ्मयलोकिकेऽप्यध्वनि धीरधिषणानाम्. प्रारब्धस्य च पूर्णचित्तहृदयाः सहृदया देशयन्ति नव समकक्षवस्तुतत्त्वं ज्ञेयाय ध्येयाय समुपविशेत्. चित्यस्य चेदस्य लोकोत्तरवस्तुनो गजनिमीलिकयाऽपश्यतो महते क्षणाय प्रेक्षावताम्. कियन्तु परिमीयेत वेद्यात्यमग्नमना कनकमुसोलयत इवाऽयथार्थं प्रशिक्षाचकत्याऽऽद्यान्यहृद्यो पद्यज्ञानस्य सचेतसश्चेतसः. एकोऽपि जोषाद्यः सुपर्युक्तः कामगवीत्वमिवतथा प्रयोक्तुरेव विभर्ति जोत्स्नमिति पूर्वेषां कुलमिवनिर्ध्वनयत्येव पूर्वतो निदुग्धदुग्धः. यथा यथमोचित्यादस्मृता भणितिरेव वालावपि धात्रीव जनयति सदसती वर्त्मनी, मात्रावाप्यतथाभूता च सखी करोति कर्णशूची, किमियं किंवदन्ति. सुहृदप्यवयति चिरं चिरन्तनप्रभावत्वभावमर्मज्ञां प्रज्ञां वा वाचामेव चतुरीयचमत्कारतात्पर्ये. सूक्तिविधयेव याचन्ते सुकुमारकुमार्यऽपि निसर्गजटिलान्निगमार्थान्गुडजिह्विकान्यायमर्मधुर्यैः कविवर्यैः. कामालक्ष्यत्वमाधत्ते मधुरं किमपि निसर्गतः. सर्ग एव वैदिशे पदे मूर्धन्यभावमनोरथस्थस्य पथ्या रथ्या. तदेवं विधावधानितस्य सूक्तितत्त्वस्याऽपेक्षया प्रेक्षायारक्षणमिति कर्तव्यता विशेषः परीक्षकतायाः. ईदृशेच महति दृशां दवीयसी प्रसृतेऽसंसृते वस्तुनि निसर्गसुचिरा मन्दाक्षमन्दाक्षरता नापेक्षत इति दुर्वार्योऽयमार्याणामाश्चर्यचर्यापर्यायोगः. प्रांशुपादप्यफले वामनस्यो ह्यहता कस्य विस्मयायन स्यात्. तदप्यविरतमाचारपावनव्रतश्रेतसः समुचित एव वर्त्मनि नियोजनं रञ्जनं सज्जनानाम्. वीक्षमाणाश्चैतन्यरीक्षकाः क्षत्रवन्तः स्तोत्रेषु मोदनादानं वरमिति लोकप्रवादस्येति.

कासुमतडपरजधा. } { विद्वद्दर्शनदस्य.
शम्बत् १९६८ कार्तिकयाम् } { सिंघालय सोमनाथशर्मणः.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

श्रीः

सूक्तिविवेकशतकम्

स्वोपज्ञविवृतिरत्नसमलङ्कृतम्

श्रीपीठमण्डलमणिप्रतिफलदमलस्वरूपशतैः ।
अन्यज्जगदिव सत्यं तेजः सारस्वतं वन्दे ॥१॥

जगदम्बां निरालम्बविदम्बरविलासिनीम् ।
वन्देऽखिलां कलामूर्त्तिं सूक्तिपीयूषवर्षिणीम् ॥१

ॐ श्रीः ॥ श्रीयन्त्रपीठावयवमणिगणप्रतिबिम्बितमूर्त्तिनिकुरम्बकरम्बिततया वाग्देवतायाः स्वरूपं तेजःपुञ्जमयमक्षयतत्त्वजगत्तादात्म्येनोत्प्रेक्ष्यते, नामरूपस्य जगतो न नाम्नोऽन्यत्तत्वं युक्तम् ॥१॥

एकमपि द्विकमर्थे त्रिकं प्रकारे चतुष्कमुत्पत्तौ ।
हानादाननिदानं ब्राह्मं तत्त्वं जगत्सु जागर्त्ति ॥२॥

ब्राह्म्यास्तत्त्वमद्वितीयमपि, अर्थबोधावसरे स्फोटास्फोटभेदाभ्यां द्वैविध्येन, प्रकारवर्णनावसरे संस्कृत-प्राकृत-देशीभेदैस्त्रैविध्येन, जनिनिरूपणावसरे च परा-पश्यन्ती- मध्यमा- वैखरी- भेदैश्चातुर्विध्येन निरुच्यमानं सर्वव्यवहारमुख्यकारणं स्तूयते, नाम्ना रूप्यस्य जगतः शब्दाभाव आत्मलाभस्यैवाऽसिद्धेः, अतैवार्थे जागर्त्ति सर्वोपनिषद्रहस्यं वाचारम्भणश्रुतिः ॥२॥

जयति मरुद्भिरगम्या लोकांतःस्थिततमःशमनी ।
त्रिभुवनभवनस्फारा चिरत्नतररत्नदीपिका कापि ॥ ३ ॥

देवानामप्यवेद्या जनान्तःकरणाज्ञानशमनी शब्दमूर्तिः, वायुभिरप्यनिर्वाप्या या लोकान्तरतमोनिरासिकायं स्त्रिभुवनगृहप्रकाशकरत्नदीपिकायास्तादात्म्येनाऽध्यवसीयते श्लेषभित्तिकश्चाध्यवसायः, अत्र च 'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते" इति अनुसन्धेयम् ॥३॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अन्तस्थवर्णभावादपवर्गपदस्थितौ पटवः ।
कपयो भवन्ति कवयो यत्कृपया सा महामान्या ।। ४ ।।

यदनुकम्पया, कपिप्राया अपि आन्तरवर्णमहिमाविर्भावान्मोक्षपदप्राप्तावपि समर्थाः कवयो भवन्ति । अथ च अन्तस्थसंज्ञकेष्वन्तस्थो यो वकारस्तद्भावात्पवर्गरहित-पदमर्यादादक्षाः कपयः कवयो भवन्ति, पवर्गत्यागेन वकारसम्बन्धे कपिशब्दस्य कविशब्दत्वमिति वर्ण्यवर्णयोर्विच्छित्तिः ।।४।।

कविराजहंसविलसल्लीलां मुक्तावलीविमलाम् ।
सुरसार्थैः कमनीयां देवीं वाचं दिवानिशं वन्दे ।।५।।

ब्रह्मपक्षिराजहंसेषु कविवर्येषु च विलसन्ती मुक्ताभिस्तद्वच्च विमला, सुरसमूहैः सुरसैरर्थैश्च स्पृहणीया गीर्वाणवाणी तदधिदेवता च रात्रिन्दिवं वन्दनीया प्रकृतत्वात् ।।५।।

सालङ्कृतिध्वनिपदन्यासरसोल्लासचित्रितोद्देशा ।
सुमनोन्तरङ्गरङ्गे नृत्यति नितरां गिरां देवी ।।६।।

नूपुरशब्दानुसारिपदन्यासगलदलक्तकद्रवसचित्रप्रदेशकारिण्याः पुष्पगर्भभूषित-रङ्गकृतनृत्याया नर्त्तक्या वृत्तं गर्भीकृत्य, अलङ्कार – ध्वनि -पदबन्धसहकृतरसप्रक-र्षमनोहरोद्देश्या भारती रङ्गरङ्गविद्वदन्तरङ्गे सलीलं स्फुरतीत्युच्यते, वाचां प्रकर्षो हि सूक्तिः ।।६।।

त्रिगुणं प्रभूतदुःखं नश्वरमाभाति जगदेतत् ।
दशगुणमानन्दमयं क्षयशून्यं वाङ्मयं कवेर्भुवनम् ।।७।।

सत्त्वरजस्तमोगुणाद् दुःखबहुलाद्विनाशिनो वैरिञ्चात्प्रपञ्चात्, ओजःप्रभृतिदशगुण आनन्दैकस्वरूपः शब्दस्थैर्य्याभ्युपगमादविनाशी कविवाक्प्रपञ्चोऽतिरिच्यते ।।७।।

विधिविधिविहितैरपि तै रूपैर्योगाद्युगान्यतीतानाम् ।
नित्यार्पितयुवभावा काचिन्मूर्त्तिर्विराजते सूक्तिः ।।८।।

विचित्रप्रपञ्चरचनाचतुरस्य विरिञ्चेः शिल्पान्यपि जराद्युपहतानि पाञ्च-भौतिकपिण्डमयानि वपूंषि विहाय व्यतीतयुगशतानामपि कविवर्य्याणामद्यापि युवभावं दर्शयन्ती काऽपि मूर्तिरियं सूक्तिर्नाम; दृश्यमानेषु पूर्वप्रबन्धेषु पुरः परि-स्फुरन्ति हि ते ।।८।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पीयूषद्युषदः सुमनःसमुदाय-संजुष्टा ।
लोकान्धतमसशमनी सत्कविसूक्तिः किमिन्दवी मूर्त्तिः ॥९॥

अमृतरसपूर्णा, देवैर्विद्वद्भिश्च संसेविता लोकगाढान्धकारस्य पूर्वपूर्वतरदुर्वि-सनाबद्धमूलजनाज्ञानस्य च नाशिका सत्कविभणितिः सुधाकरमूर्तिः किमित्यूह्यते ॥९॥

आगोपवधूविदितास्ते वर्णास्तानि वस्तूनि ।
काऽसौ युक्तिः सूक्तौ यस्यास्त्रपते सुधासिन्धुः ॥१०॥

त एव हि वर्णास्त एव चार्था आगोपविदिताः, परं तेषां पौर्वापर्यविशेष एव लोकोत्तरः सूक्तिसर्वस्वम्, यस्तिरस्कुरुते पीयूषसागरमप्यास्वादे, तत्तदवयव-योजनं हि नव्यं कौतुकम् ॥१०॥

छन्दोऽनुरोधसुभगा स्मृतिविषयसदर्थकमनीया ।
अभियुक्तकृतिमनोज्ञा निर्दोषा का न सेव्यते सूक्तिः ॥११॥

छन्दःशास्त्रस्यैव वेदस्य अनुरोधिनी, आनुभविकपदार्थैरेव स्मृतिगतेष्टसाध-नैं रम्या योग्यप्रबन्धेनैव शिष्टाचारेण काम्या निर्दोषा हिंसादिशून्या सूक्तिः सेव्या श्रुतिस्मृतिसदाचारविषयार्थानां ग्राह्यत्वात् ॥११॥

आकल्पकोटिकविभिर्नवनवरूपैर्निरूपितैः कापि ।
अद्यापि पौनरुक्त्यं सूक्तिर्नायात्यहो! महिमा ॥१२॥

अद्ययावदसङ्ख्यैः कविभिः शतशो निबध्यमाना सैव मुखचन्द्रोपमा काकताली-यवशादपि भङ्गीभेदान्न पुनरुच्यते, निध्यायतां विवेचकैः कीदृशी सूक्तेर्महामहिम-महनीयतेति रक्षकश्च भङ्गीभेदः ॥१२॥

यस्याः पदस्य तत्त्वं वर्षसहस्रैर्दुराप्यते मुनिभिः ।
तस्या अपि लास्यकलागुरवः सुधियः परं गुरवः ॥१३॥

यस्या एकस्यापि शब्दस्वरूपस्य तत्त्वं मुनिभिरपि दुर्लभं तामेव स्वच्छन्दानु-सारेण प्रयुज्य तयाप्यतया वा परिवर्तयन्तः कवयः पूज्याः सर्वेषाम्, नाट्योपदेश-देशिका हि ते सरस्वत्याः ॥१३॥

नैसर्गिकसर्गजुषां प्रतिपदपुलकावलीविलासपुषाम् ।
वाचामाचार्य्याणां जगदविशेषं पुलाकेभ्यः ॥१४॥

प्रतिपदरोमाञ्चसञ्चयकारिसूक्तिनैसर्गिकसर्गपरिनिष्टितकवीनामिदमशेषं तुच्छ-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

धान्यप्रायं प्रतिभासेत; पूर्वपूर्वानुरोधि कदाप्यविपर्यस्तं वैरिञ्चं प्रपञ्चं तथाप्यतया वा कुर्वन्ति कवयः ॥१४॥

विममर्ष नामरूपैरेवार्थैर्व्यवहर्तृ जगत्सु विधिः ।
सन्निर्वहन्ति कवयः पृथङ्निजार्थानवेक्षकैः शब्दैः ॥१५॥

अनामरूपत्वे व्यवहारवहिर्भावेनाऽनात्मलाभान्नामरूपजगत् सृजतः प्रजापतेर्नामानुरोधेनैवार्थानां सर्जनं नतु तद्व्यतिरेकाद् गगनारविन्दादीनामपि सर्वाणि नगराणि पार्वतस्थलान्यपि सौवर्णानि मणिमयानि वर्णयतां कवीनां तु नार्थमुखप्रेक्षिणी नामसृष्टिः सूक्तिमहिम्नैव तत्तथासीदित्यर्थतथ्यतावोधवैशद्येन पृथगर्थसत्तानपेक्षणात्, इति नामानुरोध्यर्थसृष्टेर्थाननुरोधिनामसृष्टेर्व्यतिरेकः स्पष्ट एव मर्मविदाम्, मारकतक्षौममरीचिदूर्वाङ्कुरस्पृहया न साधु चलन्ति कविजगति हरिदश्वाः ॥१५॥

नितरां सेव्याः कवयः पय इव संपाय्य सूक्तिरसम् ।
ये शिक्षयितुं बालान्दधते गुडजिह्विकान्यायम् ॥१६॥

कान्तासंमितसूक्तिभिः कटुप्रायानपि रामादिवद्वर्त्तितव्यं न रावणादिवदित्याद्युपदेशान् बालानामप्यहंपूर्विकापूर्वं ग्राहयन्तः कवयो दीक्षिता गुडजिह्विकान्यायरक्षायाम्, अराजकुमाराणां सन्ति एव वेदाः शास्त्राणि च ॥१६॥

अनिबन्धे जगति सतामसतां च निबन्धने पटवः ।
स्वच्छन्दनर्ततगिरो विजयन्ते ते निरङ्कुशाः कवयः ॥१७॥

सतामपि भूर्जत्वक्चन्दनमकरादीनां हिमगिरिमलयसागरेभ्योऽन्यत्राऽनिबन्धारः, असतामपि मण्डूकनिपानप्रायेष्वपि हंसकारण्डवादीनां निबन्धारः सुष्ठूच्यन्ते निरङ्कुशाः कवय इति ॥१७॥

परमहिमाक्रान्तभुवस्तुहिनाद्रेर्बन्धवः कवयः ।
यन्मुखभागान्नितरामन्तःसुरसा सरस्वती वहति ॥१८॥

बहुहिमाक्रान्तभूमेर्हिमाद्रेः सन्मुखभागदन्तःसलिला सरस्वती नदीव, उत्कृष्टमहत्त्वाक्रान्तभूमेः कवेर्मुखमार्गात्सहृदयवेद्यरसा वाणी निरर्गलं निःसरतीत्यनयोर्बन्धुभावः प्रतिभासते । भुव इत्यत्रविभक्तियोगपद्याच्च वैयधिकरण्येऽपि सामानाधिकरण्यनिर्वाहान्न साम्यसम्पत्तिश्रमः ॥१८॥

श्रमपथवीरैर्धीरैर्वशयित्वा नाभिजातसुताम् ।
चञ्चद्यशःसुमनसां गुच्छैरच्छैर्विभूष्यते जगती ॥१९॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitized by eGangotri
श्रमशीलबद्धवता वाहीं प्रसाद्य यात्रासत्रैर्वैदेशिकैः [illegible] वीरा धीराश्च कामप्यकुलीनकन्यां वशीकृत्यैव पुष्पतोरणवितानसन्तानैर्भुवनं सोत्सवं वितन्वत इति महत्कौतुकम् ।।१९।।

आपातमात्रदृष्टिश्चित्रकृतामिव विचित्रसूक्तिकृताम् ।
दृश्यादृश्यदशानां वर्णान्विशदावभासकान्युद्गक्ते ।।२०।।

विचित्रा हि शिल्पचित्रकृतां सूक्तिचित्रकृतां च दृष्टिः, यत् आपातमात्रेपतितापि या तत्तदर्थसर्वांगस्वरूपप्रतिरूपं नीलादिवर्णानां लिपीनां च योगं साधयति; अनुभूयते च निरन्तरनिजविध्यानविषयरयाऽपि कस्यचिदर्थस्याऽऽपातक्षतदृक्प्रसराणामुभयेषां चित्रकृतामलौकिकैः शिल्पपाटवैः कोऽप्यतिशयः, संवदति च रूपात्प्रतिरूपे इति वृत्तात्प्रबन्धे समादरेऽनुभवम्, चित्रविचित्रकृतोरैक्यमिदमतिचित्रम् ।।२०।।

आजानसिद्धमेकं मुख्यैः शिल्पैर्वितन्वतां शतधा ।
कासावद्भुतशक्तिः सदसि कवीनां नरीनर्ति ।।२१।।

अद्भुता खलु कविकुशलशक्तिः यदापामरप्रसिद्धमेकमपि मुखभववर्णनरूपैरेव मुख्यैः शिल्पैः सहस्रधापि परिदर्शयन्ती यस्य कस्याप्यर्थस्य कविशिल्पमेव महिमानमतिशाययति; न वस्तुतन्त्रा स्पृहणीयता काचित् ।।२१।।

आदिकवेः सूक्तीनाममृतद्रवपूर्णयुक्तीनाम् ।
स्पष्टास्वादरसज्ञा विजयन्ते कण्ठकूपसंयमिनः ।।२२।।

भगवतो वाल्मीकेरमृतद्रवसंभृतसर्वावयवानां गिरां यथावदास्वादरसज्ञाः क्षुत्पिपासानिवृत्त्या कण्ठकूपसंयमिनोऽपि विजयन्ते; "कण्ठकूपे क्षुत्पिपासानिवृत्तिः" इति पातञ्जलम्, सूक्तौ सत्यां किं संयमश्रमः ।।२२।।

कलिना मलिनात्मनि वा प्रतिफलितापि प्रकाशते यैव ।
सैवादिकविगवी मे नक्षीनरोचिश्चकास्तु कामगवी ।।२३।।

करालकलिकालव्यालकवलमलिनीभूतबुद्धिभूमिकास्ववतारितासु च्छायास्वपि यदीयैव शोभते नियमतः, तस्यैव महर्षेः सूक्तिः कामगवी मे भवतु प्रसादपद्धतेरेव छायावतारेऽपि सौन्दर्यात् ।।२३।।

द्वित्रैः सूक्तैर्विदुषां परिमेयः सद्गुणग्रामः ।
अपरिमितं प्रथयन्ती व्यासकवेर्भारती भाति ।।२४।।

सकृदपि विज्ञैर्विज्ञायते वक्तुर्गुणयोगः, व्यासकवेस्तु परोक्षेऽपि वाग्विसर्गे परिशीलिते

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रत्युत असङ्ख्येया गुणगणा इत्येव निश्चीयते विवेचकैरितिलोकोत्तरो महिमाऽद्वितीयस्य द्वितीयकवेः ॥२४॥

बाहुजजन्मनि विशदे वर्द्धिष्णुषु कौरवेषु दौर्जन्यम् ।
सौजन्यं दैन्यवतां पार्थानां भारतीभाषा ॥२५॥

क्षात्रबलविलासनिलयकुललब्धजन्मन्युभयतः समानेऽपि अपुनरुत्थानशय्याशयनावधिनिजभुजतेजोज्वालाशलभीक्रियमाणसहजप्राकृतविपक्षपक्षाणां विवर्धिष्णुवेशानुरूपयावज्जीवकर्मणां तदनु महेन्द्रमहनीयमहार्हमहासिंहासनासनसौख्यसीमानुभूतवतां समृद्धिसमृद्धानामपि कौरवाणामावात्यवृत्तं श्रोता कः सचेताः सदन्तघर्षमनर्थस्पृहां तदीयां न कुर्वीत, आशंशवं नैकविधोत्तिकृतिनिरूपनप्रभृतिवैदिनिकारपरम्परादरीकारानुवृत्तिनिर्वर्तितक्षात्रतेजसां नारीरुदितप्रायशोकशतावेशदुःखायितसार्वभौमानन्दानाममुत्र च व्याजदृष्टसपत्नसमृद्धिनिजजननारकव्यसनानां विषादमात्रव्यतीतसममपि पार्थानामिति वृत्तश्रोता को वा जयं नाशास्ते, किमयमितिवृत्तप्रभावः उत निबन्धुः सूक्तेश्चमत्कार इति निष्पक्षपातं विवेचकैर्विविच्यतां निश्चीयतां च तेषां दौष्टचं सौष्ठवञ्च भारतीभाषैव नान्यदितिकियाननुभावो व्याससूक्तेः ॥२५॥

कालिदासकवीनां मदकलमुक्तासखानि सूक्तानि ।
चिरधारितानि हृदये प्रसादशिक्षां मुदा ददते ॥२६॥

मत्तमतङ्गजकुम्भमौक्तिककल्पानां कालिदाससूक्तीनां हृदयधारणे लभ्यते प्रसादशिक्षा; को वा गजमुक्ताहारनिकरम्बितोरःस्थलो न प्रसीदेत, को वा प्रकृतकृतिकृतश्रमः प्रसादप्रासादशिरो न समारोहेत्, प्रसादबन्धमूर्द्धाभिषिक्तादप्यशिक्षिताः केषां पुनः शिक्षणीयाः ॥२६॥

जगदभ्यासपदस्य द्विर्भावो यस्य नाद्यापि ।
सोयं कविः कवीनां स्पर्द्धामन्दाक्षसीमयोर्विषयः ॥२७॥

यस्य पदानि सर्वसंवेद्यतया जगतः सन्निकृष्टानि; तदपि द्वितीयः कालिदासो नाद्यापि निष्पद्यते; लोकप्रसिद्धविडम्बनीयतया सद्वितीयतौचित्यात्, स च यावत्कवीनां स्पर्धालज्जयोर्द्वयोर्विषयसीमां को वा वराकः तादृशसरलारम्भदर्शनेनाहमपि स इव स्यामिति न स्पर्द्धेत; नाहं तदीयसूक्तिधूर्वह इति भग्नमनोरथो न लज्जेत च परिणतोऽपि; दुर्लभाः प्रौढकवेः स्पर्द्धयितारः निर्वहन्ति च तादृशाः स्पर्द्धाम्, नोभयमपि प्रकृतप्रसादकवेरित्यहो चमत्कारपारावारः, जगतोप्यभ्यासपदस्य नाद्यापि द्वित्वम्, अभ्यासे हि द्विर्भाव एव गौर्गौरितीदमपि कौतुकम् ॥२७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अतितर्ककर्कशधियः किं वा दुग्धाधरान्मुग्धान् ।
सममास्वादयति रसं रघुबन्धोः सत्कवेर्नटी सूक्तिः ॥२८॥

लोकोत्तरकीर्तिनिदानतया रघुबन्धुप्रायस्य प्रकृतकवेश्चित्तलासिका सूक्तिः परिणतापरिणतानपि तुल्यमानन्दयति; शब्दार्थवैमत्यदर्शनात्, अतोनुवृद्धैरप्यध्याप्यन्ते बाला अपि तामेव; नान्यस्य कस्यापीदृशी ॥२८॥

श्रीकण्ठलक्ष्म दधतो भवस्य भूत्यादिमस्य साध्वी सा ।
परमहिमालययोनिः करुणारम्भेषु गौरीडचा ॥२९॥

श्रीकण्ठपदलाञ्छनस्य भवभूतेः परममहिमा समीचीना वाणी करुणप्रबन्धेषु स्तुत्या; श्रीकण्ठचिह्नस्य पूर्णविभूतेः शिवस्य पत्नी हिमालयोत्पन्ना गौरी दयारम्भेषु श्रेष्ठेति गौगौर्य्योरैकरूप्य शब्दशवयुत्थं प्रतिभासते ॥२९॥

रोदयति शिलाः करुणैः स्तम्भीकुरुते सचेतसो ललितैः ।
आरचयत्यचिदपि चिच्चिदप्यचिद्वा जगत्सु भवभूतिः ॥३०॥

करुणेन ग्रावारोदनं शृङ्गारेण सचेतसां चित्रीभावं प्रदर्शयतो भवभूतेः प्रजापतिव्यवस्थापितचिदचिद्वैपरीत्येऽपि सूक्तिशक्तिरित्यतिशयः सूच्यते भवस्य विभूतिर्वा ईदृगीत्यहो महामहिममहनीयता ॥३०॥

दण्डिवचसि श्रुतिस्थे ममताभिनिवेशमुक्तहृदयानाम् ।
मन्ये दण्डीभवनान्नाऽन्यत्र मतिः कवीनां स्यात् ॥३१॥

श्रुत्यनुसारियतिवचनेन विवशीपहृतहृदां विदुषामन्त्याश्रमग्रहणे मतिरिव, कविवर्गगर्वसर्वङ्कषे दण्डिकविवचने श्रुते विगलितकवनाभिमानानां सद्योगुणैर्वा गृहमेधोपरमैर्वा दण्डीभवन एव मतिः स्यात् ॥३१॥

मर्मदृशां नर्मकरं घटयति दण्डिनि सरस्वती-नृत्यम् ।
प्रत्ना भवन्ति कवयो वयोधिकानां समाजमूर्द्धन्याः ॥३२॥

विवेकिनामानन्दकरं वाग्विलासं नृत्यमिव दण्डिनि रचयति पुराणकवयो वयोवृद्धसमाजश्रेष्ठा इव विशेषविवेचकाः, न तु नव्या मर्मविदः, पुरातना अपि वयोवृद्धा एव न गुणवृद्धाः, किमुतेदानींतना वयमिति वा ॥३२॥

सा जयति वाणरीतिर्यस्या विषयाः सुधीरहृदयानि ।
व्यामोहमहाम्भोधौ मग्नानि न जानते किमपि ॥३३॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यद्विषयीभावमापन्नानि धीराणामपि हृदयानि दुःसहव्यथया अस्थाननिजाभिनिवेशरिक्तताबोधाधिना च व्यामोहपरंपरापारावारप्लवादात्मानमपि न जानते; ईदृशी वाणस्येव वाणस्य रीतिः ॥३३॥

नव्यो दक्षिणमार्गः सूक्ताचार्यस्य वाणस्य ।
उदरम्भरयः कवयो यदीयकादम्वरीरसोच्छिष्टैः ॥३४॥

सूक्तिदीक्षागुरोर्वाणकवे रमणीयः सर्वसाधारण्येन प्रपाप्रायो दक्षिणो मार्गः, यत्कृतकादम्वरीरसैरेव पूर्णोदराः सर्वे कवयो न ततः पृथक्किमपि कल्पयितुं कल्पन्ते; विशति च करणपथं 'वाणोच्छिष्टमिदं जगदिति प्रवादघण्टानादः, अथ च विदुषोऽपि मद्योच्छिष्टैस्तर्पयतीत्यनुभूतचरोऽयमवामो मार्ग इति ॥३४॥

कुत्रचिदेव स्पष्टा दृढबन्धा मानसोद्भूता ।
गुप्तामृतसंपाता श्रीहर्षसरस्वती वहति ॥३५॥

पुष्करादिष्वेव स्पष्टा रोधोनिबद्धा मानसोत्पन्ना गूढसलिलधारा सरस्वती नदीव सर्वात्मना प्रायः क्लिष्टा प्रौढा मानाधीना सार्वजनिकसंवेदनमार्गविप्रकृष्टा परमास्वादा श्रीहर्षवाणी प्रसरति ॥३५॥

राधाधरबन्धुमुखात्कृतनिर्गमनामलौकिकीं सूक्तिम् ।
दधती स्वनिर्विशेषं जयदेवकवेः कृतिः स्फुरति ॥३६॥

श्रीकृष्णमुखोद्गता लोकोत्तरापि सूक्तिर्यन्मध्यपतिता न विविच्यते, इयमिति, ईदृशी जयदेवकवेः सूक्तिः, कुलापि तद्रूपेणैव श्रीकृष्णेन पूर्णं तदीयं सङ्गीतकाव्यमित्यनुसंधेयम्, राधाधरबन्धुविमुखां स्वतुल्यं पुष्णातीति व्यवहारसमासः ॥३६॥

माघाध्वनिश्रमवतां दुर्गमजडताहरार्थनिध्यानैः ।
अतिहृद्योष्णीकृतये गुरुरीतिर्भारवेः सततम् ॥३७॥

दुर्लभमौत्यव्यवस्थानिवर्तकवस्तुनिरन्तरचिन्तावशान्माघमासवर्त्मनि समनुभूतबहुश्रमाणामुष्णताकृतये खरप्रकृतिः सूर्यकिरणसन्ततिरिव सन्ततमतिहृद्या; एवं दुर्ज्ञेयजाड्यहरप्रतिपाद्यपरिशीलनचिन्तनेन माघकविसूक्तिमार्गकृतश्रमाणां लोकोत्तरपाटवसम्पत्तये भारविकवेर्गुरुरीतिरतिहृद्येति मंदधीः; अनुभूतमाघश्रौत्यव्यसनानामेव रविकिरणगौरवज्ञानम्, माघसूक्तिकृतश्रमाणामेव भारविसूक्तिगौरवज्ञानमिति प्राग्धाधिकृताधिकारिता भारविसूक्तीनाम् ॥३७॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विमलीकृते हृदि पुराऽनघमुरारिपदचिन्ताभिः ।
दुर्गमपदार्थसार्थैर्जटिलाद्बन्धात्कुतो भीतिः ॥३८॥

अनर्घराघवकृन्मुरारिकविप्रबन्धचिन्तया बुद्धिवैमल्ये दुर्गमजटिलार्थप्रबन्धकुण्ठीभावभयं नैवोत्पद्यते; जटिलरीतेः सीमानिदर्शनत्वात्, तद्रूपकस्य, महामहिममुरारिचरणचिन्तासञ्चितसुकृतनिचयाच्चित्तदोषापगमे दुर्बोधतत्त्ववस्तुगताविविक्तात्संसाराद्भयं न सम्भवतीत्यपि रहस्यप्रायम् ॥३८॥

केचिदपि नृत्तवित्तास्ताण्डवपाण्डित्यशालिनः केऽपि ।
स जयति पण्डितराजः स्वं मेने यः कपर्दिनं साक्षात् ॥३९॥

द्वयी खलु कवीनाम्; प्रसादसिद्धाः प्रौढीरूढाश्च; जगन्नाथकविस्तु कविमण्डलीकलितवाग्विलासमात्मानं भूतवेतालमध्यकृतताण्डवं पिनाकिनमेवोद्घोषयति निःसङ्कोचलेशमिति सूक्तिप्रभावः कटाक्षो वा ॥३९॥

कति समभूवन्कवयः कति वार्णवमेखलापतयः ।
नवनवनीतवयस्यः कस्यचिदेव प्रकाशते श्लोकः ॥४०॥

अनादिपरंपरापरायत्तेऽस्मिन्प्राजापत्यशिल्पे कियन्त एवादिकविप्रभृतयः कवयः, कियन्त एव चादिराजमुखा राजानः, प्रस्तूयन्ते सर्वैः, निदानं चात्र हैयङ्गवीनबन्धुर्यशोमयः प्रबन्धमयश्च श्लोक एव, नैतावत्त्वमिति स्मरणीयम् ॥४०॥

क्षौद्रक्षीरद्राक्षामृतमदसर्वङ्कषास्वादा ।
काचित्कस्यापि मुखान्निःसरति सरस्वती मूर्त्ता ॥४१॥

न किल सर्वेषामुपकरणवतामपि सर्वदा समुद्भवति सुधानिधानतन्त्री कुम्भिकासखी सूक्तिः, विसंवदति चित्रकृतामपि प्रतिरूपं प्रतिरूपान्तरम्, यत्नस्तु तदर्थः कार्यः सन्दिग्धेऽपीति न्यायमर्माभिज्ञैः, स्मर्यन्ते ह्यादौ स्थिताः क्षणमित्यादय एव सर्वैः ॥४१॥

ऊहा भङ्गी युक्ती रक्षा चैतैश्चतुष्टयैरंशैः ।
प्रतिभा-शिक्षा-भिक्षा-चेष्टाजातैश्चतुष्पदी सुगवी ॥४२॥

साङ्गसूक्तिविवेकाय स्वोपज्ञोयमारम्भः, ऊहाभङ्गियुक्तिरक्षापदोपाख्यानां चतुरंशानां योगाद् गौरिव सूक्तिरपि चतुष्पदी; ते चांशाः प्रतिभाशिक्षाभिक्षाचेष्टात्मकहेतुभेदाच्चतुर्विधा इति षोडशकला सूक्तिः कलानिधिमूर्त्तिरिव; निगदव्याख्येयाश्चैतेंशाः सहेतुका इति न व्यामोहसमारोहः ॥४२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अनुसृतकविसमयानां नवनवचिन्मोहनार्थानाम् ।
चिरपरिचयरचितैर्मार्गैरभ्यूहनमादिमो भागः ॥४३॥

सूक्तिप्रजापतीनामिदमादिमं कर्तव्यं, कविसमयानुरोधेन प्रकृते वर्णनीयो यो योऽर्थो बहुकालाभ्यासेन तत्तदर्थानामुन्नयनमिति, अत्रैवार्थे सूत्रं "अर्थदृष्टिः समाधि" रितिगुणदृष्ट्या ॥४३॥

द्रविडप्राणनिरोधैरिव नापार्थैः क्रमैः कृतव्यक्तिः ।
ऊहितनानार्थानां भङ्गीद्वैतीयिकोवयवः ॥४४॥

इदं चातःपरम्, उन्नीतानां तत्तदर्थानामनया भङ्ग्याऽभिधाने हृदयङ्गमतेति व्यक्तिप्राधान्येन समुचितक्रमकभङ्गीकल्पनमिति, नच शिरोवेष्टनेन नासिकास्पर्शसखी भङ्गी, वक्रोक्ति र्नाम जीवितप्राया सूक्तेः, उक्तं च, अर्थगम्भीरिमा पाक इति को विशेषोन्यथा कुमारप्रबन्धात्कुमारप्रबन्धस्य ॥४४॥

भङ्गीपथपथिकानामर्थानां बन्धुभिः पदैः सार्द्धम् ।
रत्नानामिव सुभगा युक्तिस्तार्तीयिको भागः ॥४५॥

तदनु च विनिश्चितभङ्गीकानां तत्तदर्थानां तदनुरूपपदानां च रत्नावलीग्रथनकल्पं योजनम् तृतीयदशाकर्त्तव्यम्, उक्तमेवाऽऽ पामरप्रसिद्धपदार्थानां युक्तिरेव सूक्तिसर्वस्वमिति, ऐकरूप्यं च शब्दार्थयोर्नियतं भिन्नश्रेणीकयोरखण्डास्वादाशक्तेः। उच्यते च पदार्थमैत्री शय्येति पूर्वैः "पदानुगुण्यविश्रान्तिः शय्या शय्येव संमता" इति छन्दोऽनुरोधिनी, अतथा च युक्तिः, उभयथापि सूक्तिभावात् ४५॥

भावकभाव्यावयवान्युक्तान्निखिलान्विविच्य सूक्ष्मदृशा ।
स्थैर्यकिलितान्कुरुते रक्षा सेयं तुरीयांशः ॥४६॥

ततश्च शक्तिभक्तिव्यक्तिमार्गैरनुभावकेषु शब्देषु अनुभाव्येषु बोध्यमात्रेषु कणशो विवेकेन ततः परमाधानो धरणायोग्यस्वरूपस्थिरीकरणरूपा रक्षा चरमकोटिः। सूत्रितञ्चैतत् पदाधानो धरणमवेक्षणमिति । इदञ्च साध्यगिरामावापोद्वापेन, सिद्धगिरां तु तद्विनापि दृक्पातमात्रेण, संलक्ष्यक्रमः पूर्वेषाम्, असंलक्ष्यक्रमश्चोत्तरेषां विवेक इति प्रेक्षणं नियतं सर्वेषाम्, ऊहेनाऽनूहेन वाद्यश्चादूहासहत्वव्यवस्थितिफलाप्रेक्षैव रक्षा, एतैरंशैः समाप्तिः सूक्तेः, नियताश्चैतेंऽशाः, अरोचकिनां स्वेन, सतृणाभ्यवहारिणां च परेणाऽपि निष्पाद्याः, अन्यथा न सूक्तिः, नातः परमवशिष्यते किमपि, उक्तमेवाभियुक्तैः "आधानोद्धरणे सावद् यावद्दोलायते मनः, पदस्य स्थापिते स्थैर्ये हन्त सिद्धा सरस्वतीति ॥४६॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पूर्वतरैः संस्कारैर्निर्मलमनसां पुनःपुनर्नव्यम् ।
केषामपि संयमिनां स्फुरति मुखात्प्रातिभं सूक्तम् ॥४७॥

निरुच्यन्ते हैतवो भेदाः, त एवांशा जन्मान्तरीयसंस्कारपरम्परापराकृतमनोमलानां लोकवृत्तानुरोधलब्धदेशिकोपदेशलेशसहकारेणैव पुनःपुनर्वैचित्र्येण निष्पद्यमानाः प्रातिभाः उच्यन्ते, योगिनामिवावधानमात्रप्राधान्यात्तद्वचपदेशः, इयत्तानुबन्धवैधुर्याच्छिरोलेखः, मूलं चादृष्टम् ॥४७॥

नानादेशिकविदुषामुपदेशैर्दीर्घकालमभ्यस्तैः ।
विमलीकृतधिषणानां प्रसरति शिक्षार्जितं सूक्तम् ॥४८॥

त एव दीर्घकालादरनैरन्तर्यसत्कारसेवाभिदृंढभूमिकालाभे शिक्षाभ्यासवशादुद्भवन्तः शिक्षार्जिताः, मृद्वीमध्याधिमात्रा च शिक्षाः, मृदुर्मध्यस्तीव्रश्च संवेगः, शिक्षावैगतारतम्यं सूक्तितारतम्याय; अधिमात्रोपायतीव्रसंवेगानां सीमालाभः, शिक्षासीमायामपि द्वितीयतैव पूर्वस्माल्लौकिकहेतुसापेक्षत्वात् ॥४८॥

परपरिशीलितसुपथः शीलवृत्या सञ्चितैरंशैः ।
निष्पादितं पटुधियां भव्यं भिक्षाकृतं सूक्तम् ॥४९॥

त एव परनिबन्धेभ्यः कणशः संचिता भिक्षाकृताः, अंशानां तथात्वेन सूक्तस्याऽपि तद्व्यपदेशः.इदमनुसन्धेयं हेतुमात्रे, संभवन्त्यर्थानामुभयनं भङ्गीयोजनं रक्षा च परविद्वम्विनी; अंशसंचय एव निबन्धुः सूक्तमंशिसंचये तु मूलकवेरेवेत्यंशसंचयः श्रेयस्करः पटूनाम्, अपटूनान्तु तथापि दुरुक्तिः, तृतीयश्चायं पूर्वयोः, परसामग्रीमुखप्रेक्षणात्, इदमुन्निनीषूणाम्, उन्नतानां पूर्वे, अयोनी चादिमे अपारयतामन्ययोनिरियमासेव्या उत्तरसिद्धौ पूर्वभूमिकारोहात् ॥४९॥

व्युत्पत्त्यपूर्णमनसामप्यनिशं तत्क्रियाभ्यासे ।
भवति घुणवर्णकल्पं कदापि चेष्टाभवं सूक्तम् ॥५०॥

त एव नैसर्गिकधवलिमविमुक्तहृदां भिक्षोपयोगिशिक्षाभिरपि विकलानामर्धमुग्धमतीनां निरन्तरक्रियाभ्यासे कदाचिद्घुणलिपिवदकस्मादुद्भवन्तश्चेष्टाभवाः, काकतालीयवदहेतुकतयाऽनिर्वाह्याच्चरमोऽयं भेदः, नाव्युत्पन्ननिबद्धेति सूक्तिरप्यसूक्तिः, घुणवर्णस्याप्यात्मलाभाप्रसक्तेः, उत्तरत्र पूर्वोपायानुबन्धसिद्धावपि न याथातथ्यमिति व्यपदेशोसाधारणः, नचान्येष्युपायाः, अदृष्टेः ॥५०॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

हृदयाकाशे विदुषां रहिते तमसाऽमृतस्य निधिः ।
षोडशकलाभिरामः सूक्तब्रह्म प्रकाशते क्रमशः ॥५१॥

उपदेशादिभिस्तमोपगमे विदुषां दहराकाशे प्राणादिषोडशकलं नित्यमुक्तं ब्रह्म यथा सिद्धमेव साक्षाद्भवति, तथैवासमाध्यादिदोषापगमे प्रस्तुतषोडशकलात्मकममृतस्वादुसूक्तमपि अन्तरङ्ग एव क्रमशोऽधिकारितारतम्येन समुदेति, तमःशून्याकाशे षोडशकलसुधानिधिसमुदयेऽपि तौल्यमनुसन्धेयम् ॥५१॥

श्रुत्युपपत्त्यभ्यासैस्तमसि विलीनेऽन्यकृत्यविमुखानाम् ।
अद्वैतावन्दघनं सूक्तब्रह्म स्वतः स्फुरति ॥५२॥

चित्तशुध्युपयोगीतरकाम्यकर्मत्यागिनां श्रवणमननिदिध्यासनैरप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिरूपप्रतिबन्धकतमोविलये स्वप्रकाशाद्वितीयानन्दमयं ब्रह्मैव शास्त्रश्रवणेन पूर्वसंस्काररूपोपपत्त्याभ्यासेन च मनोवैमल्ये, इदं पराणां निरूपमानमानन्दप्रचुरं सूक्तमितरनैरपेक्ष्येण प्रकाशत इति तत्त्वम्, उट्टङ्कितं हि शक्तिनिपुणताभ्यासत्रिकस्य सूक्तिहेतुत्वं सर्वैः ॥५२॥

ब्राह्मे समये विजने मन्दालोके विनीतचित्तानाम् ।
लीलाविसृत्वरपदा विशदा सान्निध्यमेति वाग्देवी ॥५३॥

अभ्यासशालिभिः कालदेशविशेषा अनुसरणीयाः, व्युत्पन्नैरपि सौकर्याय; अवहितं हि चित्तमर्थान्यथावत्पश्यति, ब्राह्मे समये चिरन्तनानुभवाः पराभूतास्तदानीन्तनाश्च भाविन इति, विजनेन श्रोत्रपारवश्यमिति,मन्दालोकेन दृग्वश्यतेति च स्थैर्यं मनसः, पूर्णालोके दृग्वृत्त्या अनालोके च निद्रामुद्रया नानुकूल्यम् तस्य, अतो नु गुहाप्रिया मुनयः, सूत्रितं चैतत्, विविक्तो देशः, रात्रियामस्तुरीयः काल इति ॥५३॥

मार्गा महाकवीनां कविसमयविदे सदा सेव्याः ।
बन्धक्रियाविशुद्ध्या सूक्तिलता सद्यशः सुमं सूते ॥५४॥

कविसिद्धान्तज्ञानाय विवेचनीयाः पुनः पुनः पूर्वेषां महाकवीनां प्रबन्धाः, तेनैव बन्धशैलीशुद्धिविवेकः समुदेति,उपयोगितया विन्यस्ता हि वृद्धसेवा सूत्रकृता भङ्गीमार्गेण, आधारबन्धक्रियाशुद्ध्या कल्पलतेव निबन्धनरीतिवैमल्येन सूक्तिःसद्यशसा फलवती भवति, अविविच्य यं कमपि मार्गमयथावदभिनिविष्ट उपहास्यः प्रेक्षावताम् ॥५४॥

कामगवीव नवीनानर्थानर्थावहान् ददती ।
या न कदापि श्राम्यति गैर्वाणी जयति सा वाणी ॥५५॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

विचित्राः पूर्वेषां मार्गाः, त्रिश्रेणिविभक्ता हि प्रथमतः प्रथममध्यमचरमभेदात्सूक्तिः, आद्या सुरभिरिवापरिमितार्थप्रदा, विवेचकबुद्धितारतम्येन यस्यां नवनवार्थाः पुनः पुनः कल्प्यन्ते, नवैतावदिति नियम्यन्ते सा नैसर्गिकी परिणततराणाम्, दुर्लभासौ प्रतिभात्मिका ॥५५॥

चिद्वृत्तिशतनिरुद्धा प्रतिपदनतिभिः कथञ्चिदासन्ना ।
सूक्तिरपि गभीरभावा मुग्धेव निषेव्यते कविभिः ॥५६॥

मध्यमा च भयलज्जादिवृत्तिपारतन्त्र्येण प्रतिपदं सख्यनुरोधादिनाप्यासन्ना गभीरभावा मुग्धेव चिद्दोषात्, हठाकृष्टैरपि पदैर्युक्तापि सदाशया सूक्तिः श्रव्या, क्लेशसाध्यतया द्वितीयेयं साधारणानाम्, शिक्षाबलं मूलमस्याः, दिनत्रयी सिद्धापि सूक्तिरेव सूक्तिः ॥५६॥

भिक्षावृत्तिगृहीतैः सुरसैरर्थैरलङ्कारैः ।
प्रतिसंस्कृतापि रमते सूक्तिर्दीनद्विजाङ्गनामित्रम् ॥५७॥

चरमा च भिक्षालब्धभूषादिभिरपि शोभमाना भिक्षुकगृहिणीव, परनिबन्धेभ्योप्यानुपूर्वीपरिहारेण सञ्चितैः रसादिभिरपि सद्योगात्सूक्तिर्ग्राह्या; परतन्त्रेयं तृतीया बालानाम्, अभिनवयोगेन न पूर्णा चोरी, आद्ये अयोनी, इयमन्ययोनिः, छायाऽपि व्युत्पित्सूनां ग्राह्या, अस्यामप्यप्रविष्टा अनधिकृता एव सूक्तौ । भिक्षासूक्तेर्हठिकासूक्तौ ततोपि नैसर्गिक्यामास्वादातिशय इति तारतम्यं सुस्थम्, उत्तरसिद्धौ पूर्वपूर्वसिद्धिः, आकस्मिकाप्यास्वेवान्तर्भवति स्वाङ्गभेदवशादिति नास्यां स्वरूपपरिगणनायामुपायभेदचातुर्विध्यम् ॥५७॥

कियदंशेषु विशेषास्वादापि समेव भाति मधुसूक्तिः ।
हीरतुलाकलितरसैः सर्वांशैर्दीप्यते सितासूक्तिः ॥५८॥

पुनरन्यथोत्तमं सूक्तद्वैतं, मधुसमं सितासमं चेति; सर्वेषु बोध्यबोधकांशेषु आस्वादैकरूप्येऽपि पश्चात्प्राणप्रायो मूलास्वादः कस्मिन्नप्यंशे परीक्षकाणां यत्र भासते सा मधुसूक्तिः, सर्वरससमासे मधुनि सर्वांशमाधुर्याविशेषप्रतिभासेऽपि स्पष्टमंशस्वादतारतम्यं विवेचकानाम्; ईदृशी च निःशेषच्युतेत्यादि, अद्यमपदे स्वादातिशयात्, यत्र न कुत्राप्यंशेऽतिशयः सर्वांशे हीरतुलातुलित आस्वादः सा सिता सूक्तिः, संवदति चेदंस्थिताः क्षणमित्यादौ; अन्वयव्यतिरेकविवेच्योऽसौ भेदः, अनयोरियमतिरोचेत परीक्षकेभ्यः, दुष्करा चेयं पूर्वा, सर्वांशैकरूप्यरक्षासाध्यत्वात्, वक्ष्यते च लवणभावमहिमा; न पूर्वत्र लवणभावो वक्तुमुचितः ॥५८॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

निद्रार्द्धमुद्रितदृशोप्यास्याल्लास्याद्विनिःसरन्त्येव ।
कस्याप्यूहापोहौ नो मृष्यति सिद्धसूक्तिः सा ॥५९॥

निद्रामुद्राविलासदशावशादर्धविकसदुत्पलमुकुलायमाननयनयुगलस्यापि कवेर्वदनादस्पष्टवर्णविभागमस्पृष्टावधानक्लेशं निरर्गलं प्रलापनिर्विशेषं निःसरन्त्येव कस्यापि विशेषविदः पुनरावापोद्वापानर्हा सिद्धसूक्तिः, दुःसाध्या चेयं सिद्धानामुक्तिः ॥५९॥

दृश्यश्रव्यविशेषः सहृदयहृदये पदात्पदं गन्तुम् ।
श्रुतितो विभेति यस्या दुःसेव्या चित्रसूक्तिः सा ॥६०॥

यस्याः श्रवणमात्रात्सर्वेष्वर्थेषु सहृदयान्तरङ्गरङ्गे दृश्यवत्प्रतिभासमानेषु दृश्यश्रव्ययोर्भेदं वस्तुदृष्टचदृष्टिकृतं केऽपि न पश्यन्ति सेयं चित्रसूक्तिः, ईदृशीमन्तर्हितदृशा पश्यतः कस्य चित्राभिलाषः ॥६०॥

आपातश्रुतिमात्रात्सर्वानर्थान्पुरःस्थितान् कुरुते ।
अत्युक्तिलेशविकला मान्या स्वाभाविकी सूक्तिः ॥६१॥

यस्यामापातश्रुतायामेव सर्वेऽर्थाः पुर इव परिस्फुरन्ति; यथावस्थितवस्तुस्वरूपयथार्थोपस्थितिपरमार्थेयं स्वभावोक्तिः, भावस्वरूपपरत्वात्, अत्र च परिहार्यो गन्धोप्यत्युक्तेः, एष एवातिशयः कवेर्यदत्युक्तेरपि युक्तवस्तुभावापादनं नाम, अतथाभवदतथैव भावयतः को विशेषः कवेरकवेः, प्रसादातिशयश्चावलंबनमस्याः, पूर्वादृश्यवन्मानसिकप्रतिभासकारिणी, अर्थान्यथार्थतया गमयति, इयं तु पुर एव वस्तुस्थितिसमाहर्त्रीति, पूर्वातिशयोक्तिप्रतिभासक्लेशसहा, इयं तदसहेति च पूर्वस्यां उपरि भूमिकेयमिति परोक्षापरोक्षप्रतिभाततोऽनयोर्विवेकः, पूर्वा ततोऽपि परा परमापारयन्ति परःशतमत्युक्तीः, विरलाभावसत्तावागिनः स्पष्टमेवातः कुमारकवेः सर्वे कुमारकवयः ॥६१॥

सदसद्वेति विवेक्तुं यस्यां प्रभवति मनो न कस्यापि ।
आपातमात्रवेद्या रम्या सीमासु गूढोक्तिः ॥६२॥

यापातज्ञाताभिधेया अपि किमिदमुच्यते साधु वाऽसाधुवेति न विविच्यते कुटिति कैरपि प्रतिपत्तिमूढैरिव सेयं गूढोक्तिः, नचेयं क्लिष्टा, तस्या अन्तेऽपि तथाभावात्, अस्याश्च निध्यानचक्रचङ्क्रमणोत्तरमास्वादातिशयात्, परमिमां सूक्तिभावमापादयितुं सीमासोपानारोहणे यत्नः कर्तव्यः, परिचेयाश्चेद्दृश्योऽनर्घराघवीयाः ॥६२॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

गर्भविबोधविकला परितो मधुमाधुरी छुरिता ।
सा सर्वतो सुखवती पुष्करिणीवास्ति गर्भोक्तिः ॥६३॥

अगाधा पुष्परसमाधुर्यनिश्चिता जलयुक्ता पुष्करिणीव सुदुर्वेद्याशया मधुमधुरा सर्वतः प्राधान्यदर्शिका गर्भोक्तिः, दृश्यन्ते हि काश्चनैवंविधा इदमिदं वा कवेरभिप्रेतमिति निश्चेतुमशक्याः सर्वतः स्वादवत्यस्तथाप्यतथापि संगता इव सूक्तयः स्तनाङ्गरागादित्यादयः कुमारोक्तयः ॥६३॥

गगनारविन्दमालाः सुवर्णसूत्रेषु संहृग्ग्रथ्य ।
सहृदयहृदयेऽर्पयतो हर्षादद्भुता सूक्तिः ॥६४॥

खपुष्पायमाणपदार्थानपि संक्षेपात्सूत्रप्रायेषु सुवर्णेषु युक्तिवृद्धिवैभवबशेन संग्रथ्य सहृदयहृदयानुभवपथिकान्कुर्वतः कवेर्हर्षाज्जायमाना सूक्तिरद्भुता, इयं पुनः श्रीहर्षकवेरेव अद्भुतसूक्तिर्जृम्भते न हि ततोन्यस्य कस्याप्यत्यन्तासम्भवितया भासमानानामप्यर्थानां तादृग्युक्तिकौशलम्, स्पष्टं चैतन्नैषधसेविना "मेतत्प्रत्यर्थिनारीगिरिवरे" त्यादिकं शतशः ॥६४॥

कान्ताकटाक्षवीक्षादीक्षाशिक्षाविशेषदक्षाणाम् ।
केषामपि सद्विदुषां पीयूषमयी विभाति वक्रोक्तिः ॥६५॥

कान्तादृक्त्रिभागसहचरी वक्ररीत्या वाच्यप्रदर्शनप्राणा सरसा चेद्रम्या वक्रोक्तिः, नायमलङ्कारः' तत्र शब्दकृतेर्गात्, नच तत्रार्थो रसास्वादः, रसास्वादवती च विरला लोके ॥६५॥

तीर्थविदामुक्तिशतैरप्यादरवर्त्मनो विमुखान् ।
साधयति नीतिसूक्तिः क्लेशावेशावहाश्चर्याः ॥६६॥

अन्यादृशी चासौ नीतिसूक्तिर्या कान्तासम्मितापि प्रभुसम्मितसूक्तेरविशेषा; शास्त्रकृदुक्तिसदुपदेशे शतेऽपि क्लेशविशेषभयेन मन्दादरास्पदानि लोकचर्याः साभिनिवेशं ग्राहयति नस्योतानीव 'लोकान्, प्रायश्चेदृशीभिर्मुद्राराक्षसम्, कोन्यथा विदुरनीतेरपि मूर्द्धन्यभावः ॥६६॥

सुकुमारैः पदरचनैर्धीराणां मर्म दमयन्ती ।
दमयन्तीव नलाप्या का वा न चकास्ति कर्तरी सूक्तिः ॥६७॥

ललितैः पदन्यासैर्धीराणामपि मर्मभेदिनी नलप्राप्यासामान्यलापनिका दूरभूता द्वितीयदमयन्ती कर्त्तरी सूक्तिः, भवन्ति चेदृश्यः केषामपि दोषज्ञाना "मुत्पत्स्यतेऽस्ति

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

मम कोपि समानधर्मा" आस्ये धास्यतु कस्य नास्यं, पुराणमित्येव न साधु सर्वम्" इत्यादय कविमन्यानां हृदयभेदेऽसिलतासदृश्यः ॥६७॥

बाल्ये प्रसादशैलीं मध्ये लब्ध्वा परं प्रौढीम् ।
पुनरन्ते शान्तिमतां प्राञ्जलसूक्तानि सेव्यानि ॥६८॥

कियत्यो वा भूमिकाः परिगण्यन्ते सूक्तिनर्त्तक्याः पणदृग्भिः, अयं तु निष्कर्षः, आदितः शिक्षाग्रहदशायां प्रसादाभ्यासः, पूर्णे च प्रसादे शिक्षाग्रहेष्यवसिते पूर्णोपकरणैः प्रौढचभ्यासः, परां काष्ठामवतीर्णायां प्रौढचां पुनः प्रसादपथोऽनुसर्त्तव्यः, तदेवं सूक्तानि प्राञ्जलानि निष्पद्यन्ते। सोयं क्रियाप्रकारः अर्थाः प्रौढीपूर्णाः, पदानि च प्रसन्नानीति प्राञ्जलभावे सर्वसंवेदनं लोकोत्तरश्चास्वादः, प्रथमैव द्वितीयामन्तराकृत्य तृतीया भूमिका संपद्यते; आदावेवप्रौढचभ्यासे पदार्थविवेकोऽपि दुःसंपादः स्यात्, भक्तिप्रायत्वात्पदप्रवृत्तेः, प्रौढचनारोहे च न विचित्रकल्पनास्वादः, पुनः प्रसादानवतारेत्वसाधारण्यात्सक्षपातिनैवेति प्रसादरीतेः प्रौढीशिरः समारुह्य पुनः प्रसादानुसारः साधुः, पदेषु साधारणी अर्थेष्वसाधारणी भासते सूक्तिः, युक्तं चैतत् बाल्ये शान्तानां यौवने चानुभूतनानाविषयप्रौढीभावानां पुनर्वार्धके शान्तानां सूक्तानि श्रव्याणि. उपदिशन्ति ते, इत्थमित्थमिमे दोषाश्चेत्थं त्याज्या इति सुलभा गुणव्याख्या पण्डिताः, दुर्लभाश्च दोषहेयभावदेशिकाः ॥६८॥

अव्यक्तध्वनिबहुला जटिलार्था प्रौढिमात्रभूयिष्ठा ।
मृदुतामनाप्य सर्वैर्दुर्वेद्या हर्षसूक्तिरिव ॥६९॥

अस्पष्टशब्दरूपा दुर्बोधार्था ओजःपूर्णा हर्षगद्गदोक्तिमृदुभावप्राप्तिपर्यन्तं दुर्विवेच्या भवति, स्वरमार्दवे च जाते ज्ञायेत एवायमर्थ इति एवं हर्षकवेः सूक्तिरपि अस्पष्टध्वनिपूर्णा, निर्धार्यार्था प्रौढीपूर्णा मार्दवमन्तरा दुर्वेद्या सर्वैरिति प्रौढेः प्रसादानवतारदोषनिदर्शनं विचिन्त्यतां विवेचकैः ॥६९॥

मधुरमृशैलीशीला मृदुतरपदविभ्रमैर्लसल्लीला ।
अवधेयाशयसुभगा केषां हेया कुमारोक्तिः ॥७०॥

यथा मधुरा मृदुपदन्यासशालिनी श्रव्याशया कुमाराणामुक्तिस्तथैव कुमारकाव्योक्तिः कस्य त्याज्येति प्रौढिप्रसादावतारनिदर्शनम्, अर्थप्रौढीं शब्दे प्रसादमभ्यस्यतां प्राञ्जला सूक्तिरिति तत्त्वम् ॥७०॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

शब्दार्थरसप्रबन्धालङ्कृतिगुणदेशकालेषु ।
चञ्चति सर्वावयवेष्वौचित्यादच्युता सूक्तिः ।।७१।।

शब्दार्थादिषु सर्वेष्वंशेषु रक्षणीयमौचित्यम्, अंशांशेष्वनौचित्यं तिरस्कुरुते लौकिकमपि रसास्वादम्, कस्मै रोचते मक्षिकादूषिता खर्जूरी. अतो दीयतां दृष्टिः परीक्षकैरौचित्यविचारचर्चायाम् ।।७१।।

न मनोज्ञा सूक्तिवधूर्बहुलालङ्कारसन्निवेशेन ।
केवलसमला सकलावयवानां लवणभावेन ।।७२।।

वधूर्न केवलमलङ्कारेण शोभते, किन्तु निर्दोषसर्वावयवलावण्येनैव, लावण्यवती स्वनलङ्कृताप्यलङ्कृतैव नहि दुर्गतकुटुम्बिनी न रम्या इश्यकुटुम्बिनी रम्येति प्रायो वादो नियतः सूक्तिरप्येवमेव नालङ्कारसन्निवेशमात्रेण सुभगा अपि तु निर्दोषा लवणभावेन लवणरसोनाम सर्वांशेष्वविशिष्टः न कस्मिन्नप्यंशे न्यूनाधिकता तस्य दृष्टा तथैव सूक्तिरसः सर्वेष्वंशेषु समतयास्वाद्येत इदमेव मैत्रमित्युक्तम् ।।७२।।

स्तुत्या पिच्छिलसूक्तिर्लोकोत्तरयद्रसाम्भोधौ ।
अहमहमिकया लग्नान्यखिलस्वान्तानि मज्जन्ति ।।७३।।

सूक्तेः पिच्छिलभाव एव स्तुतिमूलं यदा स्वादाभिमुखानि सचेतसां हृदयानि ततोऽपसर्तुं नेच्छेयुः, अहंपूर्विकया च चेतःप्रवृत्तिः स्यात्, दृश्यन्ते चेदृश्यः सूक्तयः, उत्तररामचरितादिषु केषाञ्चित् ।।७३।।

पञ्चभ्योऽनियतेभ्यः पदवाक्यतदर्थभङ्गिकोशेभ्यः ।
भिन्नं रसतनुगुह्यं सदुक्तितत्त्वं प्रकाशयति बन्धम् ।।७४।।

स्वप्नसुषुप्तितुरीयावस्थासु स्थूलसूक्ष्मकारणशरीराणां व्यतिरेकात्तत्तदधोन्वयाश्चाविनाभावाभावाच्छरीरत्रिकात्मकपञ्चकोशेभ्यो विविक्तं गुहानिहितमानन्दघनं सच्छब्दतत्त्वं स्वकल्पितं बन्धमयमीदृश इति परमार्थतः प्रतिभाससत्तावत्तया प्रकाशयति किं वा, ईदृशमपि सत्पञ्चकोशादेवाविवेकात्काल्पनिकनैकभावाभिनिवेशाद् बन्धसंपादकम्; तथा पदवाक्यपदार्थवाक्यार्थभङ्गिरूपपञ्चकोशेभ्य एतत्पञ्चकव्यभिचारेऽपि रसाव्यभिचारेणैव सूक्तिभावादन्वयव्यतिरेकाभ्यां विविक्तम् रसरूपमानन्दास्वादमयं व्यक्तिविषयतया गुह्यं सूक्तितत्त्वमेव प्रबन्धप्रकाशकं भवति,एतेन शब्दरीत्यभिधेयालङ्कारवक्रोक्तिरूपेभ्यः पञ्चकोशेभ्यः पृथग्रस एव सूक्तितत्त्वमित्यत्रात्मतत्त्वविवेक इवानुवृत्तव्यावृत्तन्याय एव शरणमिति तत्तत्पक्षाः कटाक्षिताः कक्षीकृताश्च रसास्वादपक्षः, युक्तं चालौकिकस्यैव वस्तुनस्तत्त्वभावौचित्यमिति ।।७४।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

यद्रसरसनाबसरे निःशेषं वाङ्मयं शुक्तम् ।
मेयमगण्यैः पुण्यैर्ज्ञेयं कस्यापि तत्सूक्तम् ॥७५॥

यादृशसूक्तास्वाददशायामितरवाक्प्रपञ्चमात्रं प्रय्युंषितभावाम्लमिव प्रतिभाति तादृशमेव सूक्तपदास्पदम्, अतिपुण्येनैव साध्यते स्वाद्यते च, उक्तं च गुरुभिः पुण्यैः कस्याप्यगण्यैः परिणमति मुख इत्यादि ॥७५॥

न श्लाघ्या सूक्ष्मधियां जडभावकृतास्पदा सुक्तिः ।
सेव्या निसर्गसुभगैर्द्राक्षापाकैः कषायिता सूक्तिः ॥७६॥

आत्मविशेषगुणोच्छेदरूपतया जडभावसाधनीभूतायाः मुक्तेर्बहिरन्तःस्फुरद्रसवती सूक्तिरेव विवेकिभिः सेव्या "द्राक्षापाकः स कथितो बहिरन्तःस्फुरद्रस इति अस्यैव पाकस्य प्राधान्यमुक्तम् ॥७६॥

सुरतेषु यथा मृदुला कलहेषु यथौजसो भूमिः ।
शिक्षासु यथा मिश्रा लब्धावसरैव शोभते सूक्तिः ॥७७॥

सुरते मृदूक्तिः, कलहे त्वोजःस्विनी, शिक्षायां कदाचित्सामपरा कदाचित्तर्जनप्राया सूक्तिरेव शोभते, विसंवादिनी खलु ह्यन्यथोक्तिरिति लोकरीत्यनुरोधेन वक्तृवाच्याद्यनुरोधिनी ग्राह्या, सा सा विधेति नैकेन पथा प्रबन्धनिर्वाहः, इति नैकस्यामेव रीतौ स्थेयं प्रबन्धूभिः क्षुद्यन्तां सर्वे मार्गाः ॥७७॥

कश्चित्स सूक्तिपाको ब्रह्मानन्दाद्वये यदास्वादे ।
आसादयन्ति सुधियः किञ्चन साहित्यसौहित्यम् ॥७८॥

सूक्तेः परिपाकावस्थायां ब्रह्मानन्दनिर्विशेषसौख्यमनुभवन्त इति कर्त्तव्यमूढा इव क्षुधामप्यजानानाः साहित्यसौहित्यदशामासादयन्ति भावुकाः, लोकोत्तरा हि सूक्तिपाकास्वादतृप्तिः ॥७८॥

अविरोधपथं गमितैः सुभगा नानारसैः सूक्तिः ।
निम्बायते सितापि द्रागेव तदेकतानताभ्यस्ताः ॥७९॥

न चैक एव रसः सर्वांशतः प्रबन्धव्यापी स्यान्न स्वदते हि तथा परं प्रधानरसास्वादाप्रतिकूलमार्गेणान्तरान्तरा निवेशनीयाः सर्वेऽपि रसाः, आश्रयविषयभेदादिश्चाविरोधरक्षाप्रकारः ॥७९॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

ओजस्विनी प्रसन्ना मृदुपदविन्यासशालिनी सूक्तिः ।
वरशय्यामधिशयिता सार्द्रीकुर्यात्र कस्य मनः ॥८०॥

प्रौढया प्रसादयुक्तया कोमलपदन्यासवत्या पदमैत्रीरूपशय्याधिष्ठितयाऽऽनन्दानुभाविकया सूक्तया विदग्धवनितातौल्यमवलम्ब्यते "पदानुगुण्यविश्रान्तिः शय्या शय्येव सम्मता, इत्युक्तम् ॥८०॥

या मुदिता मोदयते रोदयति चराचरं रुदति ।
सा सूक्तिरीतिरेका च्छेकानामितरथा तु भेकानाम् ॥८१॥

प्रमुदिताः करुणा वा येषां सूक्तयः ककुभोऽपि हासयन्ति ग्रावा अपि रोदयन्ति त एवच्छेकाः, नचेदिकमाराद्धं भेकैः कविचक्रवर्तितां लब्धुम्, न हि सतृणाभ्यवहारिणामुक्तिः सूक्तिः ॥८१॥

तन्नतु युक्तं सूक्तं रसनामार्गं गते यस्मिन् ।
कणिकेव कापि दुष्टिः कुण्ठीकुर्यात्र कस्यचिद्रसनाम् ॥८२॥

नियमेन हानाय विवेक्तव्या. सर्वे दोषाः, तदेव सूक्तेर्भागधेयं जीवितं वा यन्निर्दोषत्वम्, अपि रोचेत शर्करिलं पायसं कस्मा अपि, उक्तमेव स्याद्वपुः सुन्दरमपि चित्रेणैकेन दुर्भगमिति ॥८२॥

कविचर्याभिनिवेशाभिन्नानि भवन्ति वृत्तानि ।
न पुनरलौकिकपाकास्वादायुक्तानि सूक्तानि ॥८३॥

निर्दोषलेशरसास्वादं निर्वोढुं वृत्तान्यप्यन्यथाक्रियन्ते मर्मविद्भिः, दृश्यन्ते हि रामादिप्रबन्धेषु विधानानि बहुविधानि नायकौचित्यरक्षायै वालिवधादौ, को विशेषोऽन्यथा काव्येतिहासयोः ॥८३॥

अनृषीणां सर्वेषां स्वार्थान्वृत्तेरपेक्ष्य सूक्तयः सफलाः ।
सूक्तिभिरेव कवीनां कल्पन्तेऽर्थाः स्वरूपलाभाय ॥८४॥

प्रसिद्धमेव लौकिकानां तथार्थान्येव वचनानि गृह्यन्ते परीक्षकैः, न हि खपुष्पं दृश्यतामित्युक्तेः कोऽपि सचेता नयनं पर्यावर्तयति, सूक्तिसिद्धास्तु सिद्धा इव न संदिह्यन्ते मणिमयाः शैलादयः ॥८४॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

परिलिप्ता रक्तमृदा शाद्वलभूमध्यपर्णशालापि ।
मरकतवेदीविलसन्माणिक्यमयी प्रमीयते सूक्तैः ॥८५॥

सूक्तावेतावान्विश्वासमहिमा, पर्णशालाऽपि रत्नमयी निश्चीयते भावुकैः, कस्य वा कवेः प्रबन्धगतानि नगराणि मृण्मयानि वनानि वा नन्दनन्यूनानि? यथोच्यते तथैव गृह्यते हृदा ॥८५॥

शृङ्गारलङ्गिनि कवावभिनवनवनीतकूपिका युवतिः ।
तस्मिन्नेव शमस्थे सलभरपरिवाहवाहिनी श्वदृतिः ॥८६॥

कस्याप्यनिर्वचनीयावयवस्य सतिलसौवर्णमदननिवापपात्रतामनुश्रुत्य वशीकृतिमन्त्रगुरुम्, उत्तानोक्कूनमण्डूकपाटितोदरसहोदरतां चाकर्ण्य विलासीकृतिमन्त्रगुरुं कविं को नानुसरेत्, आन्तरोऽनुरागोऽपरागो वान्यथोदेतुं प्रभवेत्, उक्तमेव शृङ्गारी चेत्कविः काव्य इत्यादि ॥८६॥

घनमण्डलेषु गजतां हृदयेषु विचित्ररत्ननगराणि ।
तथ्यान्यनुगमयन्ती सूक्तिः किल शाम्बरी शक्तिः ॥८७॥

मेघेष्वपि हास्तिकं शब्दबलादेव हृदयेषु रत्ननगरावभासं सत्यतया दर्शयन्ती सूक्तिर्न विशिष्यते ह्याम्बरविद्यायाः, एतदेव महत्त्वं सूक्तेरत्यन्तासम्भविनोऽपि सत्यभावेनैव गृह्यन्ते निःसंशयं मार्मिकैरर्थाः, इदमेवोक्तं कविरेकः प्रजापतिः, यथास्मै रोचते विश्वं तथैव परिवर्त्तत इति ॥८७॥

अर्थक्रियाविहीनानपि गमयन्ती सतां भावम् ।
सर्वास्तीर्थकृदुक्तीः कुरुतेऽश्रव्याः कवेः सूक्तीः ॥८८॥

आस्तिकानां तदन्येषां वा तीर्थकृतामर्थक्रियाकृत्वमेव सत्त्वमिति घण्टाघोषोऽपि न श्रूयते कविसूक्तिभिः, मण्डूकनिपातेऽपि हंसकारण्डवचक्रझङ्कारपरम्पराभिर्बधिरीक्रियन्ते दशापि दिशः ॥८८॥

यावत्तथ्यीकुरुते विधिशक्तिश्चतिगामिनोऽप्यर्थान् ।
उन्नतिमर्हति तावत्सूक्तिः संमोहिनी विद्या ॥८९॥

विरिञ्चेरपि शिल्पकल्पनापराभूतानपि विषयान्निर्वादभावानुभवविषयान्कुर्वती सूक्तिरैन्द्रजालिकीं मन्त्रविद्यां स्मारयति, अनतिशायितया प्रतीतातिशयोक्तिरेव सूक्तितत्त्वम् ॥८९॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

अरिभवनं गहनवनं स्वामिवनं भवनमण्डलीसुभगम् ।
निष्पादयति कवीनां विरिञ्चिधिषणातिशायिनी सूक्तिः ।।९०।।

दृष्टेषु सूक्तिशिल्पेषु नायकवनं प्रमदवनं प्रतिनायकमन्दिरं च वनीभूतमिति कस्य सचेतसः प्रत्ययपदवीं नारोहेत्, निर्मीयते हि चित्तभित्तौ लङ्काजर्जरीभावस्य चित्रमयोध्यासमृद्धेश्च ।।९०।।

दुःसाध्यानपि साध्यान्साध्यांश्च सुसाध्यपक्षनिक्षिप्तान् ।
घटयन्ती सूक्तिकला सकलासु दशासु जागर्ति ।।९१।।

सूक्तेरेवायं महिमा, यदशक्तिर्नाम जगतो निर्वास्यते; दुन्दुभिध्वनितप्रायमिदं खलु रोगराजादपि मुमुचे मयूरः, लेभे च शतशो महार्हरत्नावलीं रत्नावलीकविसूक्तैरिति ।।९१।।

अमृतैरप्यनवाप्यां सुचिरोत्कण्ठापथातिथीभूताम् ।
जनयति सौहित्यदशां सर्वेषां रसवती सूक्तिः ।।९२।।

रसयुक्ता त एव पाकभूसदृशी सूक्तिर्बहुकालाभीप्सितां सुधयाप्यनिवार्यां तृप्तिं जनयति, रसास्वादप्रभेदाः स्युः पाकाः इव स्थिताः इति लोकोत्तरा द्राक्षानारिकेलपाकास्वादतृप्तिः ।।९२।।

बहुकालकण्ठशुद्धया सिद्धैः सामस्तवैः साध्यान् ।
साधयति स्तवसूक्तिः सुतरां मनसोप्यचिन्तितानर्थान् ।।९३।।

सामस्तवे कियती कण्ठशुद्धिरपेक्षते कियान्वा व्यवसायः, कियता वा समयेन तत्परिपाकः, कथं वा तत इष्टसिद्धिरिति दुर्गमा शिलाशैलशैली, सूक्तिभिस्तु च्छिन्नभिन्नाभिरर्द्धमुग्धजल्पितसोदराभिरप्यवाप्यते मनोरथपथरथप्रयाणसुखपरम्परा सहसेति हृद्यो महिमा ।।९३।।

तीर्थे गवां सहस्राण्यवतार्य सुपात्रहस्तेषु ।
रसपानायार्पयतां फलमाकल्पं यशःप्रसरः ।९४

तीर्थे पयस्विनीगोसहस्राणि विद्वद्भ्यो ददतामिव प्रबन्धरूपेण वाचां सुरसानां निचयं प्रयुज्य विवेचकेभ्य आस्वादाय वितरतां कवीनामक्षयो यशोविशेषसमूहउच्यतीति समासेनोक्तिः ।।९४।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

प्रभुशक्तेरनवाप्यानतिमार्गान्मित्रशक्तेश्च ।
निष्पादयति कवीनामर्थान् रमणीव सूक्तिशक्तिर्वाक् ॥९५॥

त्रिविधा हि सूक्तिस्थितिः काचित्प्रभुसंमितोक्तिर्वेदादिरूपा, काचित्सुहृत्संमितोक्तिः पुराणादिरूपा, काचन कान्तासम्मितोक्ति : सूक्तिरूपा, उत्तमा चान्त्या, साभिनिवेशप्रवर्त्तनात् ॥९५॥

प्रतिमां तामप्रतिमां श्रेयः स्थेयो धनं सुधनम् ।
आनन्दमिममनन्दं कविकामगवी न किं सूते ॥९६॥

आकल्पस्थायि निरुपमं यशःशरीरं, सूक्तिसन्तुष्टेभ्यो देवेभ्यः स्थिरं भव्यं, धावकादीनामिव श्रीहर्षादिर्धनमात्मन्यानंदं च कविगवी कामगवीव सर्वानर्थान्साधयतीति तत्त्वम् ॥९६॥

सारस्वतभङ्गजुषां स्वातिघनरसप्रपूर्णगर्भाणाम् ।
सूक्तीनां शुक्तीनां मुक्ता इव कीर्तयः प्रसवाः ॥९७॥

सरस्वत्तरङ्गगामि–स्वातिनक्षत्र– दृष्टमेव जलपूरणगर्भशुक्तीनां मुक्ता इव सरस्वतीसम्बन्धिमार्गगानां स्वस्मिन्नतिघनरसपूरणानां सूक्तीनां कीर्तिविस्तार सत्फलमिति ॥९७॥

लक्ष्मीत्यागान्मुदिता कविवाणी कीर्तये राज्ञाम् ।
कृपणेष्वात्मसपत्नी सङ्ग्रहविमुखाबलम्बते मौनम् ॥९८॥

दानिनां राज्ञां निजसपत्नीभूतलक्ष्मीत्यागेन कविसरस्वती सुयशः करोति, अन्यथाविधेषु तु सपत्नीसंग्रहेण विमुखा कथंकारं कुर्यात्, ते खलु न कदापि वेद्यन्त असावासौदिति दातृषु कवयो मुदिताः सूक्तिभिराकल्पस्थायि यशः कुर्वन्ति, अदातारस्त्ववर्णिता नैवायत्यां ज्ञायन्त इति कविसूक्तिरेव राजकीर्त्तिजननी, स्मरणीयमत्र 'न कोपनीयाः कवयः क्षितीन्द्रैः' रिति केन विस्मर्तुं पार्यते जाग्रति व्यासवचसि खाण्डवदाहि गाण्डीवपाण्डित्यम् ॥९८॥

चिन्तेक्षणकुड्मलिता बिम्बच्छदनच्छदास्यपल्लविता ।
प्रोल्लासिहृद्विकसिता कस्मै नार्थाय सूक्तिकल्पलता ॥९९॥

सूक्तिकल्पलताध्यानावसरे क्षणानि कुड्मलमुद्रादर्शनात्, तत उच्चारणावसरे चलितललिताधराणि वदनानि पल्लवा मुकुलीभावत्यागेनेषत्पाटलिमोदयात्,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. Mumukshu Bhawan Varanasi Digitization by eGangotri
तत आस्वादावसरे निर्मलहृदयानां रसवत्त्वं विकसत्पूर्णभावात्, कविसमया-
द्रूपणौचित्यम् ॥९९॥

प्रतिबन्धशतनिरुद्धाः पशुबधविधयो मुधा सुधालब्धौ ।
समयं कञ्चिदगण्यं सूक्तिरसाय व्ययीकुरुत ॥१००॥

क्रत्वर्थलिम्भविधिविभिन्नविषयकपुरुषार्थनिषेधविधिबोधितदुरुदर्केषु प्रतिपद-
प्रत्यवायपरम्परापादकेषु यागेषु न समुचितः श्रमः सुधामात्रलालसया, लभ्यत एव
निरर्थकदुर्लभसमयलेशमात्रव्ययेनापि वाचामगोचरः कविसूक्तिरसो नाम ॥१००॥

नमथ बुधाः किंसु मुधा क्षुब्धां वसुधासुधाधरां मुग्धाम् ।
वरयत जीवन्मुक्तिं विषयान्तरयोषिणीं सूक्तिम् ॥१०१॥

वसुधापीयूषाधरासु मुग्धासु नैवलभ्यं विगलितवेद्यान्तरावभासं जीवन्मुक्तच्व-
स्यानन्दसन्दोहानुभवदायिसूक्तिराकरसमनासेव्य को वा बुधभावो विषयिषु धीरेषु
इति ॥१०१॥

कान्तेव सदुपदेशान्सुगमैर्भङ्गैर्हृदि प्रथयन् ।
जीयाद्वदने सुधियां पीयूषक्षिरं गिरां मार्गः ॥१०२॥

नानाविधकटूपदेशानपि सुगमरीत्या ग्राहयन्कान्तापादाब्जसेवासङ्क्रान्ततदीय-
गुण इव कश्चन लोकोत्तरचित्तविस्तारपरम्परातरङ्गिणी समुद्भवस्थानं सूक्तिमार्गः
कदापि न क्षीयतामित्यन्ते आशास्यते ॥१०२॥

उपसंहारः-

एतत्सूक्तेः शतकं कतकं जेतुं प्रसादने मनसः ।
साञ्जलिबन्धं विदुषां चरणेषु विशेषतः पतति ॥१०३॥

पङ्कभावमापन्नस्य कतकमिव जलस्य मनसः प्रसादं कुर्यादिति बहुदोषमपि बालार्द्ध-
मुग्धजल्पितमिव ग्राहयमिदं शतकम्, विवेकाय विद्वत्सु सविनयनिचयमुपहारीक्रियते
घटयित्रा ॥१०३॥

अतिशेते नात्र रसो नो वा लोकोत्तरः पाकः ।
पीयूषपूषमनसामधितिष्ठेद्रुचिपथं कथङ्कारम् ॥१०४॥

नास्मिन्प्रबन्धे विचित्रः कश्चन रसः, मच लोकोत्तरकल्पनापरिपाकः, तत्कथं-
नु वा पीयूषपूपरसास्वादलालसेभ्यो रोचेत, तदिदं धीरप्रतिवीरछायासितोपलाभिला-
षिषु रागखाण्डवार्पणम् ॥१०४॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

सूक्तिविशेषाँल्लेशाँश्चिन्वन्त्वस्मिन्विवेचकाः क्लेशात् ।
शब्दब्रह्मदिदृक्षोर्माधुकरीयं गरीयसी वृत्तिः ।।१०५।।

यदपि नात्र सर्वेशाः प्रेक्षावतां प्रेक्षाविषयाः, येन प्रसादवादायेदं तदपि लेशतोऽपि यः कश्चनांशस्तथाविधः कल्पनीयः सचेतसाम्, शब्दब्रह्मतत्त्वस्यात्मतत्त्वस्यैवोपलम्भमूलं मधुकरवृत्तिरिव लेशसंचयरीतिः श्रेयस्करी. कर्मोपरतेर्बोधातिशयाच्च बालजल्पितं कस्याप्यंशस्यादरेण सकलीक्रियतामिति गर्भः ।।१०५।।

कुचकचजघनाद्रिमुखा शतकोक्तिर्जर्जराप्येषा ।
प्रकटीकुर्यान्नितरामार्या परिशीलनौचित्यम् ।।१०६।।

केषांचित्कुचशतकमन्येषां कचशतकमितरेषां जघनशतकमित्यस्थाने पदरत्नन्यासः, ततस्त्विदं विभिन्नं विरूपमपि कविप्रमुखमुखशारदाब्जविशारदां शारदां स्मारयतीत्येतावतैवलभेत सदौचित्यम्, तत्त्वं त्वधिष्ठातृदेवतापदपरिशीलनेनेति न मन्दाक्षम्, आर्यापरिशीलनमिति मुद्रा च ।।१०६।।

नेपालपालरूपप्रथितमहेन्द्रानुकम्पिका सरितः ।
तीरे सुखं विहरता गीतं सोमद्विजेनेदम् ।।१०७।।

नेपालपालरूपेण समुत्पन्नो महेन्द्रवीरवर्मप्रभुः । तदीयकरुणापात्रस्य सोमनाथशर्म्मणः कृतिरियमिति ।१०७।।

इदं सूक्तिशतकं स्वोपज्ञषिवृतिरत्नसमलङ्कृतम्

समाप्तम् ।।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

पण्डितराजसोमनाथशतवार्षिकसमारोहसमितिः
(कार्यसमितिः)

श्रीचूडानाथभट्टराय - सभापतिः
श्रीअम्बिकाप्रसाद अधिकारी- उपसभापतिः
श्रीलोचनाथपाण्डे ,,
श्रीपूर्णप्रसादब्राह्मणः ,,
श्रीविद्यानाथ उपाध्यायः- कोषाध्यक्षः

श्रीअच्युतराजरेग्मी- सदस्यः
श्रीकृष्णचन्द्रसिंहप्रधानः ,,
श्रीगोपालनिधितिवारी ,,
श्रीधनवज्रवज्राचार्यः ,,
श्रीनरहरिआचार्यः ,,
श्रीमाधवप्रसादघिमिरे ,,
श्रीरामचन्द्रपौडेलः ,,
श्रीराजेश्वरदेवकोटा ,,
श्रीवासुदेवत्रिपाठी ,,
श्रीश्रीप्रसादगौतमः ,,
श्रीसत्यमोहनजोशी ,,
श्रीसूर्यविक्रमज्ञवाली ,,
श्रीशिवहरिमरहट्टा सदस्य-सचिवः
श्रीनीलमणिडुङ्गाना सहायकसदस्यसचिवः

श्रीमती अङ्गुरबाबा जोशी- सदस्या
श्रीकमलराजरेग्मी सदस्यः
श्रीकेदारमानव्यथितः ,,
श्रीतुलसीरामवैद्यः ,,
श्रीनयनराजपाण्डे ,,
श्रीभैरवरिसालः ,,
श्रीयदुनाथखनालः ,,
श्रीरामणिरिसालः ,,
श्रीराधाकृष्ण अधिकारी ,,
श्रीशिवगोपालरिसालः ,,
श्रीश्रीभद्रशर्मा ,,
श्रीसिद्धिचरणश्रेष्ठः ,,
श्रीहरिदेवमिश्रः ,,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal